# वेदभाष्य टिप्पणी

‘वेदनिधिः’ ‘वाचस्पतिः’ ‘चतुर्वेद उपासकः’

Dr. वंशीकृष्ण घनपाठी

## 1. प्रास्ताविकम्

वेदः खलु भारतीयज्ञानसम्पदः आकरो ग्रन्थः इति कोटिशो जनाः अभिप्रयन्ति। कीदृशोऽयं वेदग्रन्थः यदीयो विषयः विश्वेषां जीविनामुपकाराय कल्पत इति प्रथमं विचारयामः। को नाम वेदः? कथं प्रयोजनमभिगम्यते? किं तस्य लक्षणम्? कथंभूतमस्य प्रामाण्यम्? अधिकारी कः? कीदृशः सम्बन्धः?

### 1.1 को नाम वेदः?

इष्टप्राप्त्यनिष्टपरिहारयोः अलौकिकमुपायं यो वेदयति ग्रन्थः – स वेदः।

- प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुध्यते। एनं विन्दन्ति वेदेन तस्माद्वेदस्य वेदता।। - सायणाचार्यः (यजुर्वेद भाष्योपोद्घातः)
- **विद्यते ज्ञायते लभ्यते वा एभिः धर्मादिपुरुषार्थः** इति **वेदाः**। (उवटाचार्यः – ऋग्वेद प्रातिशाख्य भाष्यम्)

### 1.1 वेदलक्षणम् – मन्त्र ब्राह्मणात्मकम्

लक्षणस्योपयोगश्च पूर्वाचार्यैर्दर्शितः- **ऋषयोऽपि पदार्थानां नाऽन्तं यान्ति पृथक्त्वशः। लक्षणेन तु सिद्धानामन्तं यान्ति विपश्चितः।।** इति। (**सर्वलक्षणपदार्थलक्षणसंग्रहः**)

यत्किञ्चित् वाक्यं बुद्धिमारोढुं, किञ्चिल्लक्षणं निर्दुष्टम् (अतिव्याप्ति-अव्याप्तिरहितम्) अपेक्ष्यते। तदर्थं किँलक्षणोऽयं वेदः, किंस्वरूप इति विचारयामः।

- **मन्त्रब्राह्मणयो.र्वेदनामधेयम्।** तत्र हि अव्यभिचारेण तत्स्वरवर्णमात्रापूर्वकः पाठ उपलभ्यते। सर्वकालं सर्वदेशेषु प्रतिचरणम् (प्रतिशाखम्) अविभागेन, एकैको मन्त्रराशिः वेदः इत्युच्यते स्म। तस्य वेदस्य मन्त्रप्रकारान् अनुसृत्य भगवान् वेदव्यासः वेदराशेः विभागं चकारेति पुराणप्रसिद्धिः।

### 1.2 वेदभागाः पञ्चधा।

यद्यपि स्वरूपतः मन्त्रब्राह्मणयोर्वेदनामधेयमिति लक्षणं प्रत्यपादि, तथाऽपि अर्थप्रतिपादनावसरे, वेदवाक्यानां पञ्चविधत्वं अभ्युपगम्यते। तद्यथा अर्थसङ्ग्रहे –

1) मन्त्रः 2) विधिः 3) निषेधः 4) नामधेयम् 5) अर्थवादः। एतेषु प्रथमं मन्त्रं विहाय, अवशिष्टाः सर्वे भागाः ब्राह्मणवाक्यान्तर्भूताः इत्यग्रे स्पष्टीकरिष्यते।

## 1.3 **मन्त्रलक्षणम्**

- **अथ मन्त्राणां लक्षणं, तत्प्रकारांश्च** विज्ञापयामः। वेदार्थविचारशास्त्रमिति प्रसिद्धे मीमांसाशास्त्रे, भगवता जैमिनिना निर्दिष्टं मन्त्रलक्षणं विलोकामहे। तद्यथा-
- **तच्चोदकेषु मन्त्राख्या।। 32।। (जै.सू. 2-1-32)**
  **(जैमिनीय न्यायमाला विस्तरे सप्तमाधिकरणम्-** (जै.न्या.वि. 2.1.7)
- अहे बुध्निय मन्त्रं म इति मन्त्रस्य लक्षणम्। नास्त्यस्ति वाऽस्य नास्त्येतदव्याप्त्यादेः अवारणात्।। 22।।
- याज्ञिकानां समाख्यानं लक्षणं दोषवर्जितम्। तेऽनुष्ठानस्मारकादौ मन्त्रशब्दं प्रयुञ्जते।। 23।।
- अग्न्याधेयप्रकरणे मन्त्रोऽय.माम्नायते- **अहे बुध्निय मन्त्रं मे गोपाय** इति। (तै.ब्रा.1.2.1)
- तत्र मन्त्रस्य लक्षणं नास्ति, अव्याप्त्यतिव्याप्त्योः वारयितुमशक्यत्वात् इति न शङ्कनीयम्।
- याज्ञिकसमाख्यानादेव मन्त्रस्वरूपं ज्ञायते। शिष्टाः याज्ञिकाः अयं मन्त्रः इति, तेषु मन्त्रेषु च इमा ऋचः, एतानि यजूंषि, एतानि सामानि- इति प्रयोगवशात् विविच्य प्रदर्शयन्ति।
- **तच्च याज्ञिक समाख्यानम्, अनुष्ठानस्मारकादीनां वेदवाक्यानां मन्त्रत्वं गमयति** इति जैमिनीय-मन्त्रलक्षण-सूत्रार्थः। **उदाहरणार्थं कांश्चन प्रकारानत्र विविञ्मः।**
- **उरु प्रथस्व**- इत्यादयोऽनुष्ठानस्मारकाः।
- **अग्निमीळे पुरोहितम्-** इत्यादयः स्तुतिरूपाः।
- **इषे त्वा**- इत्यादयस्त्वान्ताः।
- **अग्न आ याहि वीतये -** इत्यादय आमन्त्रणोपेताः।
- **अग्नीदग्नीन् विहर-** इत्यादयः प्रैषरूपाः।
- **अधस्स्विदासी3दुपरि स्विदासी3त्** इत्यादयो विचाररूपाः।

- **अम्बे अम्बाल्यम्बिके न मा नयति कश्चन** - इत्यादयः परिदेवनरूपाः।
- **पृच्छामि त्वा परमन्तं पृथिव्याः**- इत्यादयः प्रश्नरूपाः।
- **वेदिमाहुः परमन्तं पृथिव्याः**- इत्यादय उत्तररूपाः।
- एवमन्यदप्युदाहर्तव्यम्। ईदृशेषु अत्यन्तविजातीयेषु वाक्येषु, याज्ञिकानां समाख्यान.मन्तरेण, नाऽन्यः कश्चिदनुगतो धर्मोऽस्ति, यस्य लक्षणत्वमुच्येत।
- **विहितार्थाऽभिधायको मन्त्रः** इति, **मननहेतु.र्मन्त्रः इति, असिपदान्तो मन्त्रः, उत्तमपुरुषान्तो मन्त्रः इति वा उपलक्षणतया यद्यप्युपचर्यते, तथाऽपि**

  **मन्त्रोऽयम्** इति अभियुक्तानां याज्ञिकानां विदुषां समाख्यानादेव मन्त्रत्वं बोध्यते- इति वचनं सुस्थितम्।। 23।।

## 1.4 मन्त्रत्रैविध्यम्

अथ कतिविधो मन्त्रः इति जानीमः, येन प्रकारेण भगवता वैशम्पायनेन विभागोऽकारि। कर्मसु अनुष्ठानकाले प्रयुज्यमानाः मन्त्राः ऋक्- यजुः सामरूपाः इति त्रिविधाः श्रूयन्ते।

- यमृषयस्त्रैविदा विदुः। ऋचस्सामानि यजू॑ꣳषि। (तै ब्रा 1.2.26)
- ऋचस्सामानि जज्ञिरे। ... यजुस्तस्मादजायत। (ऋ.सं 8.4.2)??

इत्यादि वेदवाक्यमुखात्, ऋचः- सामानि- यजूँषि इति त्रिविधा मन्त्राः बोध्यन्ते।

- **अहे बुध्निय मन्त्रं मे गोपाय। यमृषयस्त्रैविदा विदुः। ऋचस्सामानि यजू॑ꣳषि।** अत्र व्याख्यानम्।
- त्रीन्वेदान्विदन्ति- इति त्रिविदः। त्रिविदां संबन्धिनोऽध्येतारः त्रैविदाः। ते च यं **मन्त्रभागमृगादिरूपेण त्रिविधमाहुः, तं गोपाय**- इति योजना।
- तत्र त्रिविधानाम् ऋक्-साम-यजुषां व्यवस्थितं लक्षणं कथं वर्तते? साङ्कर्यस्य दुष्परिहरत्वात् इति आशङ्का।
- यद्यपि, अध्यापकप्रसिद्धेर्हि ऋग्वेदादिषु पठितो मन्त्र ऋगादिः' इति हि लक्षणं वक्तव्यम्, तत्तु संकीर्णम्। यथा-

- **देवो व.स्सवितोत्पुनात्वच्छिद्रेण पवित्रेण वसोस्सूर्यस्य रश्मिभिः।** इत्ययं मन्त्रो यजुर्वेदे संप्रतिपन्नयजुषां मध्ये पठितः। न च तस्य यजुष्ट्वमस्ति। तद्ब्राह्मणे- सावित्रियर्चा इत्युक्तत्वात्।
- **एतत्साम गायन्नास्ते**' इति प्रतिज्ञाय, किंचित्साम यजुर्वेदे गीतम्।
- **अक्षितमसि**'। '**अच्युतमसि**'। '**प्राणसंशितमसि**'- इति त्रीणि यजूंषि सामवेदे समाम्नातानि।
- तथा च गीयमानस्य साम्नः आश्रयभूता ऋचः सामवेदे समाम्नायन्ते, यस्य ग्रन्थस्य नामापि आर्चिकम् इत्येव।
- अथ ऋग्वेदे ब्राह्मणग्रन्थे तावत्, ओमुक्थशा इत्यध्वर्युश्चतुरक्षरम् .... अध्वर्यो शो शोंसावोमित्याह्वयते तृतीयसवने सप्ताक्षरेण ... (ऐ.ब्रा., 3 पञ्चिका, 2 अध्या 1 खण्डः) अग्निष्ट्वा गायत्र्या सयुक्छन्दसा रोहतु। ... (ऐ.ब्रा. 8 पञ्चिका, 2 अध्या, 2 खण्डः) एतादृंशि यजूंषि बहूनि दरीदृश्यन्ते।
- एवञ्चेत्, तस्य लक्षणं दुष्प्रापमिति संशीयते। अत उत्तरमित्थं समाहितं स्यात्।
- यद्यपि ऋग्वेद-यजुर्वेद-सामवेदनामकेषु ग्रन्थेषु अन्यप्रकारा मन्त्रा दृश्येरन्, किन्तु तन्मन्त्रलक्षणं तु स्पष्टमेव- पादादीनाम् असंकीर्णलक्षणत्वात्।
- ऋचः एवं भवन्ति, यजूंष्येवम्, सामान्येवमिति।।
- ऋग्लक्षणम्- **पादेनार्थेन चोपेता वृत्तबद्धा मन्त्रा ऋचः।**
- गीतिरूपा मन्त्राः सामानि।
- वृत्तगीतिवर्जितत्वेन प्रश्लिष्टपठिता मन्त्रा यजूंषि।
- इत्युक्ते न क्वापि संकरः।

तत्त्रितयलक्षणञ्च **जैमिनीयन्यायमालाविस्तरस्य प्रकरणानुरोधेन प्रपञ्चयामः।**

## 1.5 **ऋग् लक्षणम्**

- **तेषामृग्-यत्रार्थवशेन पादव्यवस्था।।** (जै.सू. 2.1.35)

तेषां मन्त्राणाम् ऋक् इत्यभिधा, यत्र अर्थवशेन पादव्यवस्था। वर्णानां सङ्ख्यामनुसृत्य, गायत्री – त्रिष्टुप् – जगती – अनुष्टुप् – पङ्क्तिः – बृहती – उष्णिक् इत्यादिभिः छन्दोनामभिः ऋचः विभज्यन्ते। एकैकस्मिन् पादे, एतावन्तो वर्णाः इति वेदे छन्दश्शास्त्रे च स्पष्टीक्रियते। तद्यथा-

- गायत्री – एकस्मिन् पादे अष्टौ वर्णाः, त्रयः पादाः।
- त्रिष्टुप् – एकस्मिन् पादे एकादश वर्णाः, चत्वारः पादाः।
- जगती – एकस्मिन् पादे द्वादशाक्षराणि, चत्वारः पादाः।
- अनुष्टुप् - एकस्मिन् पादे अष्टौ अक्षराणि, चत्वारः पादाः।
- पङ्क्तिः – चत्वारिंशत् अक्षराणि। पञ्चपदा।
- बृहती – षट्त्रिंशदक्षरा बृहती।
- एवं बहूनि छन्दोलक्षणानि वर्तन्ते। एकेन द्वाभ्यां ऊनीभूतायां वृद्धायामृचि, निचृत्- भुरिक् इति, सम्राट्- विराट् इति छन्दोभेदाः वर्णिताः।
- तथा च एकैकस्यामृचि कति पदानि वर्तेरन्निति च ऐतरेयब्राह्मणग्रन्थे विनियोगसमये विव्रियत इति ऋचो लक्षणम् विस्पष्टीक्रियते। अन्यत् सर्वं छन्दोलक्षणं वेदवाक्यसारसङ्ग्रहभूते छन्दश्शास्त्रे द्रष्टव्यम्।
- यद्यपि सर्वेषु वेदग्रन्थेषु ऋचो लभ्यन्ते, संहितायामेव यत्र ऋङ्मन्त्रान् उपबबन्ध भगवान् बादरायणः, तस्यैव ऋग्वेद इति नाम चक्रे।

## 1.6 साम लक्षणम्

❀एकादशे सामलक्षणाधिकरणे सूत्रम् ❀

**गीतिषु सामाख्या**।। (जै.सू. 2.1.36)

ऋगक्षराणि गीयन्ते उच्चैः विस्तार्यन्ते येषु, तानि सामानि। गीतिप्रकाराः रथन्तरम्, बार्हतं, वैरूपं, वैराजं, शाक्वरं, रैवतमित्यादि रूपेण लभ्यन्ते। योनिगानमनुसृत्य विकृतिगानञ्च क्रियते, यस्य नाम ऊहः- ऊह्यमिति च।

एवम्, ऋचां समूहरूपम् आर्चिकभागमादाय, गानरूपेण प्रतायमानो वेदभागः सामवेदः।

## 1.7 यजुर् लक्षणम्

❃ द्वादशे यजुर्लक्षणाधिकरणे सूत्रम् ❃

**शेषे यजुश्शब्दः**।। (जै.सू 2.1.37)

वृत्तगीतिवर्जितत्वेन प्रश्लिष्टपठिता मन्त्रा यजूंषि- इति लक्षणं ऋक्सामातिरिक्तमन्त्रेषु युज्यते। तत्र च अवान्तरभेदा वर्तन्ते, येषां ज्ञानं जैमिनिसूत्रेभ्यो भवति।

(त्रयोदशे निगदानां यजुष्ट्वाधिकरणे सूत्राणि 38- 45)

निगदो वा चतुर्थं स्याद्धर्मविशेषात्।। 38।।

व्यपदेशाच्च।। 39।।

यजूंषि वा तद्रूपत्वात्।। 40।।

वचनाद्धर्मविशेषः।। 41।।

अर्थाच्च।। 42।।

गुणार्थो व्यपदेशः।। 43।।

सर्वेषामिति चेत्।। 44।।

न ऋग्व्यपदेशात्।। 45।।

(त्रयोदशाधिकरणमारचयति। जै.न्या.वि)

प्रोक्षणीरासादयेति निगदस्त्रिविधाद्बहिः। यजुर्वोच्चैस्त्वधर्मस्य भेदादस्य चतुर्थता।। 28।।

परप्रत्यायनार्थत्वादुच्चैस्त्वं यजुरेव सः। तल्लक्षणेन युक्तत्वात् त्रैविध्यमिति सुस्थितम्।। 29।।

- **प्रोक्षणीरासादय। इध्माबर्हिरुप सादय। ...**
- **अग्नीदग्नीन् विहर। बर्हिः स्तृणाहि।**
- **इन्द्राऽगच्छ हरिव आगच्छ**... इत्यादयो निगदा आम्नाताः।
- **परप्रत्यायनार्था मन्त्रा निगदाः।**

- एते च पूर्वोक्तेभ्य ऋग्यजुस्सामभ्यो बहिर्भूताश्चतुर्थप्रकाराः भवितुमर्हन्ति वा?। कुतः- पादगीत्योः ऋक्सामलक्षणयोरभावात्।
- प्रश्लिष्टपाठस्य यजुर्लक्षणस्य सत्त्वेऽपि, धर्मभेदेन यजुषि अन्तर्भावानुपपत्तेः। **उपांशु यजुषा। उच्चैर्निगदेन** इति हि धर्मभेदः। **(**मीमांसाश्लोकवार्तिकम्- सम्बन्धाक्षेपवादः 29) अतः निगदाः यजुर्षु न भवेयुः इत्याशङ्का विप्रपरिव्राजकन्यायेन परिह्रियते।
- विप्रपरिव्राजकन्यायः- बहिर्ब्राह्मणा भोज्यन्ताम्। परिव्राजकास्त्वन्तः। इत्यत्र सत्येव परिव्राजकानां ब्राह्मणत्वे, पूजानिमित्तो विशेषो यथा, तथा- **निगदानां यजुषामेव सतां परप्रत्यायननिमित्तमुच्चैस्त्वधर्मः**। ततो मन्त्राणां त्रैविध्यं सुस्थितम्।। 28।। 29।।
- अथ ब्राह्मणलक्षणं पश्येम।

## 1.8 ब्राह्मणलक्षणम्

मन्त्रलक्षणमुक्त्वा, ब्राह्मणवाक्यस्य लक्षणं जिज्ञासामः, जैमिनीयन्यायमालाविस्तरमुखेन।

द्वितीयाध्याये प्रथमपादे, अष्टमाधिकरणम् - ब्राह्मणनिर्वचनाधिकरणम्

- **शेषे ब्राह्मणशब्दः।।** 32।। (2.1.32)
- नास्त्येतद्ब्रह्मणेत्यत्र लक्षणं विद्यतेऽथवा। नास्तीयन्तो वेदभागा इति क्लृप्तेरभावतः।। 24।।
- मन्त्रश्च ब्राह्मणं चेति द्वौ भागौ तेन मन्त्रतः। अन्यद्ब्राह्मणमित्येतद् भवेद्ब्राह्मणलक्षणम्।। 25।।
- चातुर्मास्येष्विदमाम्नायते- **एतद्ब्राह्मणान्येव पञ्च हवीꣳषि**- इति। (तै.ब्रा.1.7.1)
- चातुर्मास्यानि इति यागनामधेयम्। चतुर्षु मासेषु ऋतुप्रभेदेन कर्तव्याः इष्टयः इति सङ्क्षेपः। तत्र वैश्वदेवम्, वरुणप्रघासः, साकमेधः, शुनासीरीयः इति कर्माणि भवन्ति। (आप.श्रौ.सू. प्र 8 – सू 21, 22)। तत्र चतुर्थं शुनासीरीयम्। शुनासीरो नाम इन्द्र एव, इन्द्राय शुनासीराय पुरोडाशं द्वादशकपालम् – इति इन्द्रशब्दविशेषणत्वात्। (तच्छब्दव्युत्पत्तिरेवं भवति- शुनः वायुः। सीरः आदित्यः। आभ्यां युक्तः इन्द्रः शुनासीरः।)

- तत्र कर्मणि शुनासीरीये, पूर्वस्मात् वैश्वदेवपर्वणः पञ्च हवींषि अतिदिश्यन्ते- **एतद्ब्राह्मणान्येव पञ्च हवीꣳषि।** इति वाक्येन। इतः परं षष्ठं हविः – **अथेन्द्राय शुनासीराय पुरोडाशं द्वादशकपालं निर्वपति।** ... इति विधायकवाक्यम्।
- अत्र, **एतद्ब्राह्मणान्येव पञ्च हवीꣳषि**। (तै.ब्रा 1.7.1) इत्यत्रोपयुक्तो ब्राह्मणशब्दः व्याख्येयः भवति। एतच्छब्देन पूर्वप्रकरणे वैश्वदेवब्राह्मणे विहितानि हवींषि अभिप्रेयन्ते। अथ ब्राह्मणशब्दः निर्वचनीयः मीमांसाशास्त्रमुखात्।
- मन्त्रः कथंभूत इति याज्ञिकसमाख्यानेन ज्ञायते चेत्, ब्राह्मणवाक्यं कथंभूतमिति साधारणलक्षणं ब्रवीति जैमिनिः उपरितन सूत्रेण **शेषे ब्राह्मणशब्दः** इति।
- अत्यल्पमुक्तम्- इत्याभासः स्वाभाविकः, यतः तैत्तिरीयशाखायां मन्त्रब्राह्मणसंश्लेषः दृश्यते। एवञ्च ऐतरेयग्रन्थेषु, ताण्ड्यादि ब्राह्मणेषु च उभयोः वाक्याजातयोः सन्निवेशः स्पष्टः। एवञ्चेति, कुत्र मन्त्रस्समाप्तः? कस्मादक्षरात् ब्राह्मणवाक्यप्रारम्भः इति इयत्ता नावधार्यते, इति न चिन्तनीयम्।
- यावत्पर्यन्तमक्षरराशिः मन्त्रत्वमभ्युपैति इति- याज्ञिकसमाख्यानात् ज्ञातपूर्वमेव। अतः, तस्मात् मन्त्रवाक्यजातात् भिन्ने वाक्यशेषे, ब्राह्मणशब्दः श्रुत्या प्रयुक्तः इति स्पष्टीचकार भगावानाचार्यो जैमिनिः।
- यद्यपि, अनधिगतप्रयोगपारङ्गतस्य अविचारितषडङ्गशास्त्रस्य, तावती स्पष्टता ब्राह्मणभागेषु तदन्यभागेषु च अव्याप्त्यतिव्याप्तिशङ्कया न स्यात्, तथाऽपि कांश्चनात्र प्रकारानुदाहरिष्यमः। पूर्वाचार्य संगृहीतः प्रकारो यथा-

  **हेतुर्निर्वचनं निन्दा प्रशंसा संशयो विधिः।**

  **परक्रिया पुराकल्पो व्यवधारणकल्पना।।** इति।

1. **तेन ह्यन्नं क्रियते** - इति हेतुः।
2. **तद्दध्नो दधित्वम्** - इति निर्वचनम्।
3. **अमेध्या वै माषाः**- इति निन्दा।

4. **वायुर्वै क्षेपिष्ठा देवता**- इति प्रशंसा।

5. **तद्व्यचिकित्सञ्जुहवानी 3, मा हौषा3म्**- इति संशयः।

6. **यजमानेन संमितौदुम्बरी भवति**- इति विधिः।

7. **माषानेव मह्यं पचत**- इति परकृतिः।

8. **पुरा ब्राह्मणा अभैषुः**- इति पुराकल्पः।

9. **यावतोऽश्वान्प्रतिगृह्णीयात्, तावतो वारुणान् चतुष्कपालान्निर्वपेत्। इति** विशेषावधारणाकल्पनं भवति।

10. **हिनोता नो अध्वरं देवयज्या इति दशमीम्, आवर्वृततीरध नु द्विधारा इत्यावृत्तास्वेकधनासु ...** एवंप्रकारकेषु वाक्येषु **इतिकरणबहुलं दृश्यते**।

11. **अग्नये मथ्यमानायाऽनुब्रूहि इत्याहाध्वर्युः।** ऐ.ब्रा. (1.3.16) '**इत्याह**' इत्यनेन वाक्येन उपनिबद्धं ब्राह्मणं भवति इति च लक्ष्यते।

12. **ऋषयो वै सरस्वत्यां सत्रमासत** – (ऐ.ब्रा. 2.3.1) एवमादि आख्यायिकारूपं ब्राह्मणम् -

**एवमन्यदप्युदाहार्यम्।**

किन्तु, मन्त्रेष्वपि कादाचित्कतया पूर्वोक्तहेत्वादिसद्भावः स्यात्। यथा-

1. **इन्दवो वामुशन्ति हि**- इति हेतुः।
2. **उदानिषुर्महीरिति तस्मादुदकमुच्यते** - इति निर्वचनम्।
3. **मोघमन्नं विन्दते अप्रचेताः** - इति निन्दा।
4. **अग्निर्मूर्धा दिवः ककुत्पतिः** - इति प्रशंसा।
5. **अधस्स्विदासी3 दुपरि स्विदासी3त्**- इति संशयः।
6. **वसन्ताय कपिञ्जलानालभेत** इति विधिः।
7. **सहस्रमयुतं ददत्** इति परकृतिः।
8. **यज्ञेन यज्ञमयजन्त देवाः** इति पुराकल्पः।

9. **इत्यददा इत्ययजथा इत्यपचः**- इति ब्राह्मणो गायेत् इत्यस्मिन्ब्राह्मणेन गातव्ये मन्त्रे इतिकरणं वर्तते।

10. **राजा चिद्यं भगं भक्षीत्याह। यो वाऽरक्षा.शुचिरस्मीत्याह।** इत्यादौ **इत्याह** पदश्रवणम्।

11. **यमयमीसंवादसूक्तादिषु** (मन्त्रेषु) आख्यायिका गम्यते।

अतः, मन्त्रब्राह्मणरूपौ द्वावेव वेदभागौ इत्यङ्गीकारात्, मन्त्रलक्षणस्य पूर्वमभिहितत्वात्, **मन्त्रव्यतिरिक्तः अवशिष्टो वेदभागः ब्राह्मणम्- इत्येतल्लक्षणं** सुस्थितं भवति।। 25।।

---

## 1.9 विधि – नामधेय - निषेध – अर्थवादाः

विषयप्रभेदतः प्रतिपादनसौकर्याय मीमांसका वेदवाक्यानां पञ्चविधत्वमामनन्ति इति पूर्वमेवोक्तम्। 1) मन्त्रः 2) विधिः 3) निषेधः 4) नामधेयम् 5) अर्थवादः इति। तेषु विभागेषु मन्त्रलक्षणं व्याख्यातपूर्वम्। स तु मन्त्रः ब्राह्मणवाक्यबोधेन प्रयोक्तव्यविषयः।

अथ अवशिष्टाः चत्वारः नामधेय- विधि- निषेध- अर्थवादाः ब्राह्मणवाक्यकोटौ पतन्ति, येषामवगमः प्रयोगज्ञानाय व्युत्पत्तिबोधाय च उपकल्पते।

1. **विधिः**- इष्टप्राप्त्युपायं बोधयति विधिवाक्यम्। अज्ञातार्थाबोधकं विधिवाक्यम्। अप्रज्ञातार्थान् यागस्वरूपनिरूपकविषयान् देवताविशेषं, द्रव्यविशेषं, फलविशेषं, क्रियाजातं, दक्षिणां च विधिवाक्यमुखेन जानीमः। **उदा-** दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत। उद्भिदा पशुकामो यजेत। इत्यादि।
2. **निषेधः**- अनिष्ट परिहाराय निन्द्यानि कर्माणि वर्जयेदिति निषेधवाक्यमुखतः ज्ञायते। **उदा-** 1) मा हिंस्याः सर्वभूतानि। 2) तस्मादाहिताग्निर्नाऽनृतं वदेत्।
3. **नामधेयम्** - यस्मिन् नामधेये ज्ञाते कर्मानुष्ठानं सुशकं भवति, तदर्थं कर्मणां नामधेयानि निर्दिश्यन्ते। **उदा- 1)** ज्योतिष्टोमेन स्वर्गकामो यजेत। 2) दाक्षायणयज्ञेन सुवर्गकामो यजेत।

4. **अर्थवादः**- विधिनिषेधवाक्यानाम् उद्दिष्टं प्रयोजनम् उपबृंहयन् कर्मणि प्ररोचनं, निषिद्धकर्मभ्यो व्यावर्तनं च अर्थवादवाक्यानां तात्पर्यं भवति। अतः विधिपरतया, निषेधपरतया वा अर्थवादवाक्यं सार्थकं भवति इति निश्चप्रचस्सिद्धान्तः।

   a. अर्थवादवाक्यानां तात्पर्यविषये कश्चन स्यात् संशयः। विधिपरतया अर्थवादवाक्यस्य महातात्पर्यं स्यान्नाम। किन्तु स्वतन्त्रफलरूपं, अवान्तरतात्पर्यन्तु किञ्चित् भवेत् खल्विति।

      i. **<u>महातात्पर्यं नाम</u>**- संपूर्णकर्मणः उद्दिष्टं फलम्। स्वर्गप्राप्तिः, पशुप्रप्तिः इत्यादिरूपम्।

      ii. **<u>अवान्तर तात्पर्यंनाम</u>**- अङ्गभूतानां कर्मणां प्रयोजनम्। यथा- प्रयाज होमः, अनूयाज होमः, पत्नीसंयाजाः, आज्यावेक्षणं, प्रस्तरप्रहरणं, क्रतुज्ञानम् इत्यादिकानि प्रधानफलाय उपकुर्वन्ति।

      iii. एतेषां अवान्तरकर्मणां कर्मपरिपूर्तिसहकाररूपेण सह, चित्तसंस्काररूपं किञ्चित् अवान्तरफलं दुर्वारं भवति। तथा च क्रतुजनितं महापूर्वं (पुण्यं) कर्मानुष्ठाने समाप्ते, भाविकाले वा सिध्यति। अवान्तरकर्मणामनुष्ठानेन अवान्तरापूर्वं, अवान्तरतात्पर्यं स्वातन्त्र्येणापि सिध्यति वा? तादृशेऽभ्युपगमे, स्वतन्त्रफलविषयप्रतिपत्तिरूपे का हानिरिति कश्चन संशयः।

   b. **प्रश्नः**- अर्थवादवाक्यानाम् स्वतन्त्रतात्पर्यस्य अङ्गीकारे सति, **ग्रावाणः प्लवन्ते** इत्यादि प्रत्यक्षप्रमाणविरुद्धानां श्रुतिवाक्यानां, स्वार्थे प्रामाण्यं प्रसज्येत। नैतदिष्यते सिद्धान्तिनाऽपि।

      i. **समाधानम्- तस्माद्द्विस्संवत्सरस्य सस्यं पच्यते**- इत्यादीनि वाक्यानि प्रत्यक्षाऽविरुद्धानि वर्तन्ते। तेषां तु स्वार्थप्रामाण्याङ्गीकारे का हानिः?

ii. तत्र अनुवादकत्वात्, तेषां गताऽर्थता स्यात्। **अप्रज्ञातार्थानां बोधकं वेदवाक्यम्** इति खलु प्रारम्भिकप्रतिज्ञा? (प्रत्यक्षेण सस्यपाके ज्ञाते सति, पुनर्वचनं गतार्थमेव।) सत्यम्। तदर्थं अर्थवादलक्षणं विचारयामः।

c. **अर्थवादस्यलक्षणम्**

i. **विरोधे गुणवादः स्यादनुवादोऽवधारिते। भूतार्थवाद.स्तद्धानात्-अर्थवाद.स्त्रिधा मतः।।**

ii. अर्थवादः त्रिविधः। 1) गुणवादः 2) अनुवादः 3) भूतवादः

1. **गुणवादः**- प्रत्यक्षविरोधेन श्रुतानां वाक्यानां यथार्थप्रतीतिः न युज्यते। अतः तेषु गुणग्रहणं कर्तव्यम्। (गौणोऽर्थः स्वीकर्तव्यः)।

    a. **उदाहरणम् 1- आदित्यो यूपः**- आदित्यस्य गुणः प्रकाशवत्त्वं। आदित्यः प्रकाशते, घृतेनाक्तो यूपोऽपि प्रकाशते। अतः प्रकाशगुणवान् यूपः, आदित्यवत् वर्तते इति भावः। न तु आदित्य इव स्वप्रकाशत्वं यूपस्याऽभिप्रेयते।

    b. **उदाहरणम् 2- ग्रावाणः प्लवन्ते**- इति वाक्ये निमज्जक स्वभावानां ग्राव्णां प्लवनदर्शनं दुश्शकं भवति। कर्मसामर्थ्येन दुष्करमपि कार्यं साध्येत इति अभ्युपगमः वाक्यादस्मा.दुन्नेयः। इदं गुणवादस्य लक्षणम्।

2. <u>**अनुवादः**- </u>स्पष्टार्थाः अनुभवसिद्धाः नैके विषयाः लभ्यन्ते जनैः। दृष्टानां प्रज्ञातानां विषयाणां ज्ञापनाय नाऽपेक्षामहे वेदवाक्यम्। किन्तु प्रत्यक्षसिद्धं वस्तु प्रस्तुत्य, विषयान्तरमाख्यातुम् उपक्रमते वेदवाक्यम्। तद्विषयान्तरम् अप्रज्ञातमेव भवति। प्रसंगेऽस्मिन् पूर्वार्धम् अनुवादकं भवति, उत्तरार्धं नूतनविषयप्रस्तावकं चेति ज्ञायते।

a. **उदा- <u>ऊर्ध्वं वै पुरुषस्य नाभ्यै मेध्यम्- अवाचीनममेध्यम्।</u>** अत्र_मेध्यशब्दः शौचपरत्वेन ग्रहणीयः इति यद्यपि वयं जानीमहे, शरीरस्य ऊर्ध्वभागः शुचिः, अधोभागः अशुचिरिति मेध्याऽमेध्यदेशयोः मर्यादा न ज्ञायते। नाभिरेव मध्यदेशः, यत्र मेखला बध्यते, येन मेध्यम् अमेध्यं च व्यावर्त्यते इति बोधयति श्रुतिः। अत्र पूर्वार्धेन प्रज्ञातम् अर्थ.मनूद्य, मेखलया अमेध्यदेशव्यावर्तनमिति अप्रज्ञातं विधत्ते- इति अपूर्वमस्त्येव। एवमर्थवादे द्वितीयः गुणवादः द्रष्टव्यः।

3. **भूतार्थवादः** नाम आख्यायिका, पुराकल्पो वा। प्राक्तनदिनेषु युगेषु वा प्रवृत्तानां चरित्राणामाख्यानम् इति यावत्।

a. यस्मिन् कर्मण्यनुष्ठिते सति, कीदृशं फलं केन कथं प्राप्तमिति ज्ञापनद्वारा, तत्तत्कर्मविधायकवाक्ये विशिष्टां श्रद्धां जनयति आख्यायिका। अयमेव **भूतार्थवादः**, बहुषु प्रकरणेषु सर्वसाधारणः। पौराणिककर्मसु च व्रतकथारूपेण दृश्यते। एवं पूर्ववृत्तान्तबोधकं वाक्यजातं भूतार्थवादः इति प्रसिध्यति।

b. उदा- **प्रजापतिर्वै सोमाय राज्ञे दुहितरं प्राऽयच्छत्।** (ऐ.ब्रा 4.4) अतिरात्रक्रतौ उपयुज्यमानस्य आश्विनशस्त्रस्य विधानप्रसङ्गे श्रुता आख्यायिकैषा। आश्विनशस्त्रे सहस्रम् ऋचः शंस्तव्याः, तदधिका वा इति सहस्रसङ्ख्याकानामृचां ज्ञानं विधातुं श्रुतिः, देवैरपि तदधीतिप्रसङ्गं बोधयति। एवम्, अर्थवादः श्रौतार्थबोधं प्रयोजयति, विहितार्थेषु प्रवृत्तिं द्रढयति।

## 1.10 वेद प्रामाण्यम्

एकस्य वस्तुनः प्रामाण्यं कथं भाव्यते? 1) स्वानुभावात् 2) अन्येषामङ्गीकारात् 3) युक्तेश्च। इति सामान्यलौकिकव्यवहारः। प्रमाणविचारेण, सिद्धान्तपरिष्कारप्रकारेण, प्रतिपाद्यवस्तुनः प्रज्ञातत्वम्–अप्रज्ञातत्वञ्च अनुशीलयामः।

## 1.11 वेदप्रतिपाद्यं वस्तु

- विद्यन्ते धर्मादयः पुरुषार्थाः यैस्ते वेदाः- इति निरुच्यते। धर्माऽधर्मप्रबोधः येन भवति, स एव वेदः इति एकः प्रकारः।
- ऋक्प्रातिशाख्यस्य प्रारम्भिकनमस्क्रियाप्रतिज्ञा एवं वर्तते। ब्रह्मविषये वेद एव प्रयुक्ततम इति भावः। उवटभाष्यानुरोधेन तं विचारं जिज्ञासामः। तद्यथा -
- **परावरे ब्रह्मणि यं सदाहुर्- वेदात्मानं वेदनिधिं मुनीन्द्राः। तं पद्मगर्भं परमं त्वादिदेवं - प्रणम्यर्चां लक्षण.माह शौनकः।। 1।। (ऋ.प्रा. 1.1)**
- विष्णुमित्रवृत्तिः- परं चाऽवरं च परावरं- ब्रह्म। परं नाम मनसा ध्यानगम्यं सदसदात्मकं वेदान्तेषु यदुच्यते।
- **यदेतद्धृदयं मनश्च** (ऐतरेय आरण्यकम् 2.6)।
- तथा च- **महापुरुष इति यमवोचाम**- इत्यादि।
- तथा च - **ज्योतिरजरं ब्रह्म यद्योगात्समुपाश्नुते।** (बृहद्देवता 7.106) इति।
- **स ब्रह्म अमृतमत्यन्तं योनिं सदसतो.र्ध्रुवम्। महच्चाणु च विश्वेशं विशति ज्योतिरुत्तमम्** (बृहद्देवता 8.140) इति च।
- अवरं तु पुनः- करणव.दुपांशु.ध्वान.निमदोपब्दिम.न्मन्द्र.मध्यमोत्तम.स्थानेषु जपादिषु कर्मसु यत्प्रयुज्यते शब्दाऽऽख्यम् – **अग्निमीळे** इत्यादि।
- तदुक्तम् – द्वे ब्रह्मणी वेदितव्ये शब्दब्रह्म परं च यत्। शब्दब्रह्मणि निष्णातः परं ब्रह्माऽधिगच्छति।। इति शब्दब्रह्मज्ञानपूर्वकं परब्रह्मज्ञानम्।

- तस्मिन् परावरे ब्रह्मणि, यत् – वेदब्रह्माख्यम्, सदा – सर्वदा, आहुः – वदन्ति स्तुत्यादिभिः, स्तुवन्ति - विचारयन्ति – मीमांसन्ते।
- **एतं ह्येव बह्वृचा महत्युक्थे मीमांसन्ते** (ऐतरेय आरण्यके 3.2.3) इति यथा।

- क आहुः? मुनीन्द्राः – मुनिप्रधानाः। ऋषयो मन्त्रद्रष्टारः।
- कैर्नामभिः? इत्युच्यते। **वेदात्मा वेदनिधिः पद्मगर्भः परमः आदिदेव** इत्येवमादिभिः।
- वेदानामात्मा – वेदात्मा।
- वेदा इति – विद्यते ज्ञायते लभ्यते वा एभिः धर्मादिपुरुषार्थः इति वेदाः।
- आत्मा- अत सातत्यगमने। सततं सर्वदा सर्वदेशे सर्वकाले च भोक्तृत्वेन च स्रष्टृत्वेन च अतति गच्छतीति **आत्मा**। तं वेदात्मानम्।
- वेदनिधिम्- वेदानां निधिर्वेदनिधिः, वेदानां स्थानमित्यर्थः।
- जनयति पोषयति च।
- तथा च व्यासः – सृष्ट्यादौ ब्रह्मणो वेदा मुखेभ्यश्च विनिर्गताः। तत्रैव च लयं यान्ति प्रलये समुपस्थिते।। ...

एवं वेदस्य प्रतिपाद्यवस्तु ब्रह्मेति, धर्म इति च ज्ञायते। तस्य ज्ञानं वेदेनैव भवतीति भावः।

## 1.12 सिद्धान्तपरिष्कारप्रकारः

### 1.12.1 सिद्धान्तो नाम

एकस्मिन् विषये बहुभिः जनैः, बहुत्र, भिन्नकालेषु एकधैव सङ्गृहीतः यः निर्धारः प्रकर्षेण निष्कर्षेण च आद्रियते, तस्यैव सिद्धान्त इति नामधेयम्। तादृशः प्रकारः सिद्धान्तलक्षणस्य अभ्युपगमे लौकिक विषयेषु वैज्ञानिकैः प्रतिपाद्यते। एवं बहुभिः जनैः अनेकत्र विभिन्नकालेषु विषयनिर्धारणाय, अपेक्षितानि प्रमाणानि कानीति प्राथम्येन प्रस्तोतव्यम्।

## 1.13 **प्रमाण परिचयः**

सर्वशास्त्राङ्गीकारः प्रमाण विषयेषु प्रत्यक्षं – परोऽक्षम् - आप्तवाक्यमिति त्रितये वर्तते- इति तत्त्रयं परिशीलयामः।

### 1.13.1 प्रत्यक्षम् –

इन्द्रिय प्रत्यक्षमिति कथ्यमानं ज्ञानम् प्रत्यक्षम्। अक्ष्णोः प्रति – प्रत्यक्षम् इति शाब्दिकव्युत्पत्तिः। अक्षि शब्दः सर्वेन्द्रियाणां शब्द-स्पर्श-रूप-रस-गन्धग्राहिणां श्रोत्र-त्वक्-चक्षुर्-जिह्वा-नासिकानामुपलक्षकम्। इन्द्रियार्थान् शब्दादीन् स्वकीयरीत्या सङ्गृह्णन्ति इन्द्रियाणि, मस्तिष्के व्यापृताय मनसे विषयजातं प्रेषयन्ति। तादृशविषयजातं तदाकाराऽऽकारित्वेन मनः भावयति। अस्यैव प्रमाणप्रकारस्य प्रत्यक्षम् अथवा इन्द्रियप्रत्यक्षम् इति लोकप्रसिद्धिः।

### 1.13.2 अनुमानम्

जगति सर्वेऽपि विषयाः प्रत्यक्षेणैव सङ्ग्रहीतुं न शक्यन्ते। सकृद्गृहीतो विषयः कदाचित् ऊहद्वारेण मानसप्रत्यक्षमनुभवति। अस्य नामैव अनुमानम् इति। अर्थात्, इन्द्रियैः गृहीतस्य विषयजातस्य परिष्कारः पूर्वसंस्कारोपकृतेन मनसा यथा क्रियते, तस्य ऊहस्यैव अनुमानम् – इति कलयामः।

उत्प्रेक्षारूपतया वस्तु – हेतु – फलानामूहोऽयं भवितुमर्हति।

- **वस्तुनः ऊहः-**

पूर्वदृष्टं वस्तु उपमीय, अनेनैव प्रकारेण वर्तमानं वस्त्वन्तरं तज्जातीयकमिति एक ऊहः। अथवा, कारणभूतं वस्तु दृष्ट्वा तत्कार्यं कथमिति अनुमातुं शक्यते। यथा मृदं दृष्ट्वा, तत्कार्यमेव घटादिवस्तुजातमिति ज्ञायते। यद्वा मातापरितरौ दृष्ट्वा, तत्सन्ततिम् उपमानतोलनेन चिनुमः।

- **हेतोः ऊहः–**

अधुना पक्कम् ओदनं दृष्ट्वा, तन्मूलभूताः व्रीहयः, तण्डुलाः पाकसंस्कारमापन्ना इति अनुमीयते। यद्वा, पर्वते (पक्षे) धूमं (व्याप्यं) आलोक्य, तन्मूलभूतः वह्निः (हेतुः) क्वचित् गूढो वर्तेत इति अनुमान ज्ञानस्य लक्षणम्। एतदेव व्याप्तिः इति नैयायिकाः कथयन्ति।

- **फलस्य ऊहः-**

तथैव अधुना हेतुं परिशील्य, पश्चात्कालिकं फलमनुमामः। यथा – बीजावापेन पश्चादङ्कुरप्ररोहादि सस्योत्पत्तिफलान्तम् ऊहामः।

पूर्वोक्तविषयेषु पूर्वकालिकवस्तुषु इन्द्रियप्रत्यक्षज्ञानाभावेऽपि, पूर्वसम्पादित-मानस-संस्कारबलेन, एवं रीत्या भवेत्, अभविष्यत्, अभूत्, भविष्यति – इत्यादिरूपः अभ्युपगमः मनसा गम्यते। तदेव अनुमानं प्रमाणम्।

### 1.13.3 शब्द् प्रमाणम् (आप्तवाक्यम्)

गहने जगत्तत्त्वे बहून् विषयान् वयमाकलामः, यदीयं नाम-रूप-प्रयोग-प्रयोजन-पर्यवसानानि निश्चेतुं वयं न प्रभवामः। यदि ते लौकिका एव विषयाः स्युः, तर्हि मातृ-पितृ-गुरुजनसकाशात् तदीयं तत्त्वादि विज्ञास्यन्तः उपादेय-हेयप्रकारेण वयं प्रवर्तामहे।

यदि ते विषयाः अप्रज्ञाताः, तत्र अस्मत् पूर्वजानामपि ज्ञानमपर्याप्तमिति हेतोः, सर्वहेतुभूतं वेदविज्ञान.मपेक्षामहे। एतदेव शब्दप्रमाणमिति कथ्यते।

## **कथं शब्दप्रमाणं प्रवर्तते**?

प्रज्ञातेषु लौकिकेषु विषयेषु शब्दप्रमाणं तु नाम-रूप-सम्बन्धरूपप्रज्ञापनात् उपकुरुते इति स्पष्टम्। यथा जीवने प्रथमपर्यायेण गां पश्यन्तं बालकं माता एवं बोधयति।

इयं सास्ना, एते पादाः, एतौ कर्णौ, एतौ शृङ्गौ, एतान्यूधांसि, एतदुदरम्, एते शफाः – एवं लक्षणैर्युक्तो जन्तुविशेषः धेनुः अथवा गौः इत्याख्यायत - इति।

किन्तु, अलौकिकविषयेषु तादृशानां अप्रज्ञातेषु विषयेषु बोधः कथं जायते? वक्तव्यांशस्य पारलौककित्वात्, दुर्बोधो दुर्वारः इति संशीतिः स्वाभाविकी। तत्र जिज्ञासाधिकरणम्, व्याकरणप्रामाण्याधिकरणम्- इत्यादीनि मीमांसाप्रकरणानि नितान्तमुपकुर्वते।

## शब्दप्रमाणभूतायाः श्रुत्याः बोधन प्रकारः प्रमाणम्

नितान्तमप्रसिद्धाः विषयाः, अस्पष्ट विषयाः, स्पष्टविषया इति विषयप्रभेदो लोके वर्तते। त्रेधा च तद्बोधः वेदग्रन्थैः क्रियते। तद्यथा-

---

- **नितान्तमप्रसिद्धानां विषयाणां नाम-रूप-सम्बन्धादिज्ञानं साङ्गतया साकल्येन बोध्यते।**
    - उदाहरणम्- साकंप्रस्थायीयेन यजेत पशुकामो, यस्मै वा अल्पेनाऽऽहरन्ति- नाऽऽत्मना तृप्यति- नान्यस्मै ददाति- यस्मै महता तृप्य- त्यात्मना ददा- त्यन्यस्मै महता पूर्ण॰ होतव्य- न्तृप्त एवैन मिन्द्र॰ प्रजया पशुभि स्तर्पयति। (य तै सं 02 काण्ड 05 प्रपा 04 अनु 003 पञ्चा 003)
    - अत्र साकंप्रस्थायीयशब्दः लोके अप्रसिद्धः। श्रौतसूत्रपरिशीलनेन अमावास्येष्टिविकारः अयं यागः पशुकामेन यजमानेन अनुष्ठातव्यः इति ज्ञायते।
    - नाम्नि ज्ञातेऽपि तन्नाम्नः औचित्यं, तेन कर्मणा फलप्रापणरीतिः वाक्यशेषेण ज्ञायते। साकंप्रस्थायीयः – साकं सह ब्राह्मणैस्सह प्रतिष्ठते होतुमिति साकंप्रस्थायी अध्वर्युः। तस्य सम्बन्धी साकंप्रस्थायीयः यागः। (यद्यपि सर्वेष्वपि यागेषु प्रधानहोमः अध्वर्युणैव क्रियते, अत्रैव तन्नाम्ना यागनामधेयमस्तीति विशेषो बोद्धव्यः)। तत्कथमिति पश्यामः।
    - अत्र द्वौ सायन्दोहौ, द्वौ प्रातर्दोहौ, यत्र ब्राह्मणाः पूर्णपात्रैः अध्वर्यु जुह्वतमनुजुह्वति। अमावास्या एव विक्रियते यस्मै वा।
    - यस्मैकस्मैचित् मनुजाय अल्पेन प्रमाणेन धनादिकमाहरन्ति, सः आत्मना न तृप्यति। येन आत्मनि तृप्तिर्नास्ति, सः अन्यस्मै धनान्तरञ्च दातुं न शक्नुते। यदि

महता प्रमाणेन अस्मै आहरन्ति, सः स्वयञ्च तृप्यति, अन्यस्मै भूयो धनं दातुं प्रभवति। तस्यापि अतितृप्तिर्भवतीति भावः।

- अतः दर्शपूर्णमासयोः प्रधानभूताय इन्द्राय पूर्णं होतव्यम्। तृप्त एवैनमिन्द्रः प्रजया पशुभिस्तर्पयति। अनेन वाक्यशेषेण, इन्द्राय पूर्णतया दुग्धद्रव्येण यष्टव्यमिति, तेन यागेन प्रीत इन्द्रः अनुगृह्णातीति ज्ञायते।
- साकंप्रस्थायिना अध्वर्युणा सह, अन्येपि ऋत्विजः अनुजुह्वति (अनुसृत्य स्वयं होमं कुर्वते) इति प्रभूतद्रव्यसमर्पणाय बहुभिः हूयमानः पयोद्रव्यकयागः साकंप्रस्थायीयः इति श्रुत्या साक्षात् बोध्यते। एकेन दीयमानात् परिमाणात्, चतुर्भिस्समर्पितस्य परिमाणभूयस्त्वात्, फलभूयस्त्वमपि भवतीति स्वारस्यं विधिवाक्यशेषबोधात् स्पष्टीभवति। एवमप्रसिद्धार्थानां शब्दानां, कर्मणां ज्ञानं प्रत्यक्षेण, अनुमानेन च न शक्यत इति, शब्दप्रमाणैकसाध्यं कर्मज्ञानम्, धर्मज्ञानञ्च।
- अत्राह आपस्तम्बः श्रौतसूत्रेषु –
    - साकंप्रस्थायीयेन यजेत पशुकाम इत्यमावास्या विक्रियते १ १
    - द्वौ सायं दोहावेवं प्रातः १ २
    - सायं सायंदोहाभ्यां प्रचरन्ति प्रातः प्रातर्दोहाभ्याम् १ ३
    - सर्वैर्वा प्रातः १ ४
    - पात्रसंसादनकाले चत्वार्यौदुम्बराणि पात्राणि प्रयुनक्ति १ ५
    - तेषां जुहूवत्कल्पः १ ६
    - आज्यभागाभ्यां प्रचर्याग्नेयेन च पुरोडाशेनाग्नीधे स्रुचौ प्रदाय सह कुम्भीभिरभिक्रामन्नाह- इन्द्रायानुब्रूहि। आश्रावय। इन्द्रं यज - इति संप्रैषौ १ ७
    - यावत्यः कुम्भ्यस्तावन्तो ब्राह्मणा दक्षिणत उपवीतिन उपोत्थाय, कुम्भीभ्यः पात्राणि पूरयित्वा, तैरध्वर्युं जुह्वतमनु जुह्वति। १

- स्विष्टकृद्भक्षाश्च न विद्यन्ते। २
- समानमत ऊर्ध्वम् । संतिष्ठते साकंप्रस्थायीयः।। (आप.श्रौ.सू 16कण्डिका 11-16 आपस्तम्ब श्रौतसूत्रम्)

---

- **अस्पष्टविषयाणां सम्बन्ध ज्ञापनेन – विषयाः विशदीक्रियन्ते।**
    - यथा- यः प्रजाकामस्स्यात्, तस्मा एतं प्राजापत्यं गार्मुतं चरुं निर्वपेत्।
    - अत्र चरुः नाम, वितुषीकरणेन, व्रीहिभ्यो निष्पन्नानां तण्डुलानां आहवनीयाग्नौ उष्णजलसहायेन विक्लेदनक्रमात् उत्पन्नम् अन्नम्। किन्तु गार्मुतम् इति विशेषणं नाऽस्माकं बुद्धिमारोहति।
    - एतदर्थम्, अस्माभिः भाष्यग्रन्थः, कोशाश्च आश्रयणीयाः। अत्र गर्मुत् नाम, तृणविशेषः यः अकृष्टदेशेष्वेव उत्पद्यते। (कृष्टपच्यम् – अकृष्टपच्यमिति ओषधीनामुत्पत्तौ विशेषः द्रष्टव्यः, या ओषधयः मानुषयत्नमन्तरा स्वयमेव जायन्ते ता – अकृष्टपच्याः आरण्यधान्यानि यथा जर्तिलाः, गवीधुकाः। हालिककर्मणा कृषीवलेन उत्पाद्यमानाः कृष्टपच्याः ओषधयः व्रीहि-तिल-गोधूमादयो यथा)।
    - अत्र गर्मुत् विजातीयैस्सह उत्पन्नतृणविशेष इति भावः केषांचित्। यद्वा ओषधीषु दुष्टपरिणतिमानिति अपर आहुः। एवं अस्पष्टार्थानां शब्दानां वेदाङ्गादिग्रन्थसहायेन, वेदोक्तनिर्वचनेन च अर्थं निश्चित्य, शब्दार्थज्ञानेन वाक्यार्थज्ञानमभ्युपगम्य, कर्म अनुतिष्ठति यजमान कृतार्थतायै।।
- **स्पष्टविषयाणां** तावत् – प्रज्ञातफलानां साधनाय मानुषं प्रयतनमतिरिच्य, दैवानुग्रहसाधनरूपं किञ्चिदलौकिकं कर्म बोधयन् वेदग्रन्थः, उपकुरुते।
- तत्र साध्यं फलम्, साधनभूता सामग्री, देशकालादि च पूर्वसंस्कारवशात्, बौद्धा एव पदार्थाः। किन्तु तत्प्रयोग रीतिः श्रुत्या बोधिता, यया कृतकृत्यो यजमानस्स्यात्।

- उदा - कारीर्या वृष्टिकामो यजेत। अस्मिन् वाक्ये, कारीरी इति शब्दः अप्रज्ञातः। वृष्टिः अनुभूतपूर्वा। यजेत इति प्रयोगविधिः अस्पष्टा। अतः प्रज्ञातविषयां वृष्टिमुद्दिश्य, अस्माभिः देवतानां पूजनं होमादिरूपं कर्तव्यमिति, प्रयोगरीतिः इष्टिनाम्ना भवतीति शिक्षयति।
- देवतोद्देशेन द्रव्यत्यागो यागः इति प्रबोध्य, का देवता? किं यागद्रव्यम्? कथं यष्टव्यम्? कथं फलं लभ्येत? इति प्रकारकथनेन श्रुतिरुपकुरुते। एवं शब्दप्रमाणम् अप्रज्ञातार्थान् निर्दिशति।

## 1.14 **नित्यत्वम् - अपौरुषेयत्वम्**

इतःपरं, वेदानां प्रामाण्यं स्वतः सिध्यति वा? परतः सिध्यति वेति विचिकित्सा प्रारभ्यते।

- वेदप्रतिपाद्यवस्तुनः ब्रह्मणः धर्मस्य वा, प्रामाण्यविचारे बुद्धिमवगमयितुं द्रढयितुञ्च, अन्यस्य पुरुषस्य वस्त्वन्तरस्य वा सद्भावासम्भवात्, **स्वतः प्रमाणं वेदः** इति ब्रूमः। यतो हि सजातीयविजातीय-स्वगतपरगतभेद-रहितं ब्रह्मैव आसीत्, कल्पप्राक्काले। तदवस्थायां सृष्टेरभावात् न किञ्चिदासीत् व्यक्तरूपतया नामरूपाभ्यामाविर्भूतमिति कारणात्, परतः प्रमाणं न भवति ब्रह्मप्रतिपादको वेदः। एतच्च बादरायणसूत्रेषु **जन्माद्यस्य यतः। शास्त्रयोनित्वात्** (ब्र.सू.1.2, 1.3) इत्याभ्यां सूत्राभ्यां स्पष्टं भवति च।
- अतः **अपौरुषेयत्वात् , नित्यत्वाच्च वेदाः प्रमाणम्** इति च वच्मः।

### 1.14.1 **पौरुषेयत्व प्रसङ्गः**

- अपौरुषेयाः वेदा इत्युक्तम्। किन्तु, तत्प्रत्याख्यानकल्पानि पौरुषेयत्वप्रसङ्गवन्ति बहूनि वाक्यानि वेदराशावेव वर्तन्ते।
- प्रथमतः पौरुषेयं नाम- पुरुषैः प्रतिपादितं, प्रोक्तं, प्रबोधितमिति खलु। पौरुषेयत्वे सति, अनित्यत्वप्रसङ्गोऽपि दुर्वारः। वस्तुतस्तु जन्मवतां विनाशवताम् पुरुषाणां, अनित्यानां प्रसङ्गाः वेदे यथा श्रूयन्ते – तथा विलोकामहे।।
    - वसिष्ठो हतपुत्रोऽकामयत। इत्यत्र अनित्यानां पुरुषाणां प्रसङ्गः।

- कठ शाखा, शौनक शाखा- इत्यादि वेदशाखानामसु कर्तृत्वप्रसङ्गो व्यज्यते ग्रन्थकर्तृणामृषीणां नामधेयश्रवणात्।
- अन्यच्च, वालखिल्यं शंसति, भारद्वाजं शंसति, वासिष्ठं शंसति इति विधिपरकाणि ब्राह्मणवाक्यानि च तत्तन्मन्त्रकर्तॄन् बोधयन्ति।
- नम ऋषिभ्यो मन्त्रकृद्भ्यः – इति साक्षाच्च तैत्तिरीयश्रुतिरपि वर्तते। एवम् ऋषीणां वेदकर्तृत्वप्रसङ्गेन पौरुषेयत्वप्रतीतिस्स्पष्टीभवति।

## 1.14.2 **अनित्यत्व प्रसङ्गः**

अयं वेदराशिः अनादिरपि भवितुं नाऽर्हति, अकर्तृकस्य वस्तुनः अदर्शनाल्लोके – इति अनित्यत्ववादिनामाक्षेपश्च अवतिष्ठते। एवञ्च, अनित्यत्वप्रपञ्चः श्रुतिमूलक एव, नास्माकं कपोलकल्पितः। यथा वर्तन्ते वाक्यानि,

- **तस्माद्यज्ञात् सर्वहुत ऋचस्सामानि जज्ञिरे।** (ऋ.सं. 8.4.18) इति वाक्येन कस्माच्चित् पुरुषात् वेदः अजायत इति गृह्यते।
- **स भूरिति व्याहरत्। स भूमिमसृजत। अग्निहोत्रं दर्शपूर्णमासौ यजूꣳषि। स भुव इति व्याहरत्। सोऽन्तरिक्षमसृजत। चातुर्मास्यानि सामानि। स सुवरिति व्याहरत्। स दिवमसृजत। अग्निष्टोममुक्थ्यमतिरात्रमृचः। (तै.ब्रा.2.2.23)**
    - एवञ्चेत् श्रौतानि वाक्यानि भवेयुः, कथमपौरुषेयत्वं नित्यत्वञ्च सेत्स्यति। अत एव पौरुषेयः, अनित्यश्च भवति। अतः विनाशवतां पुरुषाणां प्रतिपादकवाक्यवान् वेदः, कालिदास वाक्यवत्।
    - एवञ्च पौरुषेयत्वे सति वेदवाक्यानाम्, पुरुषबुद्धिहेतुकाः रागद्वेषादिदष्टाः दोषा आपतेयुः। अतः तत्प्रामाण्यं च प्रत्याख्यायते।

### 1.14.3 सिद्धान्तपक्षः – वेदस्य अपौरुषेयत्वम्

यदुक्तं पुरुषात् ब्रह्मणो वा वेदः अजायत, तत एव पौरुषेय इति। ततः पुरुषकर्तृक दोषाः भवेयुः इति च। तदसत्।

- पौरुषेयत्वे सति दोषोद्भावनमेवं स्यात्- स्वस्य बुद्धिं प्रयुज्य उच्चार्यमाणः शब्दः, वक्तुः दोषान् प्रायेण वहेत्।
- किञ्च, अन्यपुरुष वैलक्षण्येन ब्रह्म निर्दोषम्। ब्रह्मणःनिर्दोषत्वात्, उत्पत्तिप्रयत्नाभावाच्च, वेदस्य पौरुषेयत्वदोषो न संभवति।
  - अत्र पुनः, ब्रह्मणः निश्वासात् उत्पन्नो वेदराशिः, पुरुषप्रयत्नमन्तरैव स्वयं व्यक्तः। **एवं वा अरे अस्य महतो भूतस्य निःश्वसितमेतद्- यद् ऋग्वेदो यजुर्वेदः सामवेदो अथर्वाङ्गिरसः।।** (शतपथब्राह्मणम्)
  - अतः अपौरुषेयत्वं वेदस्य निरुपप्लवमेव भवति।

### 1.14.4 सिद्धान्तपक्षः – वेदस्य नित्यत्वम्

- युगान्तेऽन्तर्हितान्वेदान् सेतिहासान्महर्षयः। तपसा लेभिरे पूर्वमनुज्ञाताः स्वयंभुवा।। इत्याह व्यासः। (शा.मी. 1.3.29)
- ब्रह्मणः सकाशात् उत्पन्नं वेदराशिं स्वतपसा, ऋषयः ददृशुः। स्वकीयेन तपसा, नित्यत्वेन वर्तमानं वेदराशिं एकैको महर्षिर्ददृशे।
- तथा मन्त्रदर्शनेन शिष्योपदेशेन च ऋषीणां मन्त्रकर्तृत्वं, मन्त्रपतित्वमिति वर्णितम्। मन्त्रकृत् शब्दः द्रष्टृत्वं, बोधकत्वमेव द्योतयति, न तु कालिदासवाक्यवत् पुरुषकर्तृकत्वम्। अतः, कालिदासादिवत् स्वबुद्धिप्रयुक्त्या विरचितमिति मन्त्रेषु नाऽभिप्रेयते। **एवं अनित्यत्वदोषसंवलितः वेदस्य पौरुषेयत्वदोषप्रसङ्गः निरस्तः।**

- यदुक्तं शाखानामानि आर्षाणीति- तत्र शाखा प्रचारकाणामाचार्यणां नाम्ना वर्तमाना वेदशाखाप्रसिद्धिः, तत्प्रवर्तकत्वमेव व्यनक्ति, न तु कर्तृत्वम्। अतः नित्यो वेदः, अपौरुषेयः, स्वतः प्रमाणं भवति।
- अतः सुस्थं वेदनामपौरुषेयत्वं नित्यत्वञ्च। तन्मुखेन स्वतः प्रामाण्यञ्च निर्दुष्टम्।

## 1.15 **अनुबन्धचतुष्टयम्-**

एवमुपन्यस्य, उपसंहाररूपेण वेदस्य सम्बन्ध चतुष्टयं स्मारयामः।

### 1.15.1 **विषयः –** ऐहिक श्रेयसे, आमुष्मिकस्य निश्श्रेयसाय च अलौकिका उपायाः

### 1.15.2 **अधिकारी-** सर्वोपि जनः, यः सुखेन जिजीविषति।

### 1.15.3 **सम्बन्धः- दुःखनिवृत्तिपूर्वक सुखप्राप्तिः।**

प्रयोजनम् – इष्ट प्राप्तिः, अनिष्ट परिहारः। अर्थात् अतिशयितः शाश्वतिकः आनन्दः, तल्लाभाय पन्थाः।